International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 156-158
© 2025 IJMH
www.themultijournal.com
Received: 22-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# पाणिनीयव्याकरणे णत्वविधिविमर्शः

**Dr. Markanda Nayak**

महाभाष्ये भगवता पतञ्जलिना व्याकरणस्य प्रयोजनं वदता अथ शब्दानुशासनम् इत्युक्तम्। शब्दानुशासनं व्याकरणस्य मुख्यं प्रयोजनम्। व्याकरणं विना भाषाणां साधुशब्दप्रयोगः असम्भवः। तथापि संस्कृतवाङ्मयस्य सर्वेऽपि भाषाव्यवहारः पूर्णतः व्याकरणमधिष्ठाय प्रवर्तते। तस्मात् संस्कृतभाषायाः सुप्रयोगार्थं व्याकरणस्य महत्त्वं सर्वातिशायि वर्त्तते ।

संस्कृतव्याकरणे अनेकेषु व्याकरणेषु पाणिनीयव्याकरणं वर्त्तते अन्यतमम्। पाणिनीयव्याकरणे शब्दानुशासनार्थं सन्ति अनेके विधयः। तेषु णत्वविधिः अन्यतमः। णत्वविधेः परिशीलनं विना साधुशब्दप्रयोगः नैव सुकरः। तथाहि रघुनाथः रामनाम इत्यादिषु प्रयोगेषु विदुषां संदेहः यत् कथमत्र णत्वं नेति। अत एव णत्वविधौ संदेहनिराकरणेऽयं प्रयासः। तत्रादौ णत्वविधायकानि सूत्राणि आलोच्य तन्निषेधसूत्राणि सोदाहरणमालोच्यते।

**णत्वविधायकसूत्राणि-**

१.रषाभ्यां नोणः समानपदे[१]- ऋ , र्, ष्कारेभ्यः परः अपदान्तस्य नस्य णकारः विधीयते इति सूत्रस्यार्थः। वस्तुतः कौमुद्याम् ऋवर्णान्तस्य णत्वं वाच्यम् इति वार्तिकमाश्रित्य ऋवर्णात् परः णत्वं विधीयते । सरलावगमनाय अत्र मया अस्मिन् सूत्रे विषयोऽयम् उपस्थापितः । उदाहरणानि यथा ऋणः, तृणम्, पितृणाम्, पूर्णम्, कृष्णः इत्यादयः । अमीषु उदाहरणेषु सर्वत्र ऋ,र्,ष्कारेभ्यः साक्षात् परः नकारविद्यमानत्वात् नकारस्य णत्वं विधीयते । वनम् इत्यादौ ऋ,र्,ष्काराभावात् नकारस्य णत्वं न भवतीति ।

२.अट्कुप्वाङ्नुम्व्यवायेऽपि[२] – ऋ,र्,ष्वर्णेभ्यः परः स्वरवर्ण-कवर्ग-पवर्ग-यवह-अनुस्वारव्यवधाने सति नस्य णः विधीयते । यथा मूर्खेण, दर्पेण, रामेण, सर्वेण, वृंहणम् इत्यादयः। किन्तु किरीटेन, आर्तेन, विरतेन इत्यादौ एतेषां वर्णानां व्यवधानाभावात् नकारस्य णत्वं न भवति।

३.पूर्वपदात् संज्ञायामगः[३]-संज्ञाविषये पूर्वपदस्थितरेफषकारनिमित्तम् उत्तरपदस्थस्य अट्कुप्वादिव्यवधाने सत्यपि नस्य णकारः विधीयते किन्तु गकारस्य व्यवधाने नकारस्य णत्वविधानं न भवति । उदाहरणं यथा- द्रुणसः, खरणसः, वार्ध्रीणसः, सूर्पणखा इत्यादयः । एते सर्वेऽपि संज्ञावाचिनः भवन्ति । चर्मनासिकः इत्यादौ संज्ञाभावात् नकारस्य णत्वविधानं न भवति । किञ्च ऋगयनम् इत्यादौ गकारस्य व्यवधानात् णत्वं न भवतीति ।

४.वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः[४]- संज्ञाविषये पुरगा मिश्रका सिध्रका शारिका कोटरा अग्रेशब्दोत्तरात् वनशब्दस्य णत्वं भवतीति। उदाहरणं यथा-पुरगावणम्, मिश्रकावणम्, सिध्रकावणम्, शारिकावणम्, कोटरावणम्, अग्रेवणम् इत्यादयः।

५.विभाषौषधिवनस्पतिभ्यः[६]-औषधवाचि-वनस्पतिवाचिरेफषकारनिमित्तम् उत्तरपदे विद्यमानस्य वनस्थस्य नकारस्य णत्वं विधीयते इति। उदाहरणं यथा दूर्वावणम्(दूर्वावनम्),

शिरीषवणम्(शिरीषवनम्) इत्यादयः। एवं प्रकारेण गिरिनद्यादीनां च वा इति वार्तिकेन णत्वविधिः विधीयते। उदाहरणं यथा-गिरिणदी, गिरिनदी, स्वर्णदी, स्वर्नदी इत्यादयः।

६.अह्नेऽदन्तात्[७]- अकारान्तशब्दे विद्यमानस्थरेफं निमित्तम् अह्नस्थस्य नकारस्य णत्वं विधीयते। उदाहरणं यथा-पूर्वाह्णः, अपराह्णः इत्यादयः। निर्ह्नः इत्यादौ अकारान्तशब्दाभावात् नकारस्य णत्वं न भवति ।

७.पानं देशे[८]- देशार्थगम्यमाने पूर्वपदविद्यमानस्थरेफं निमित्तं पानस्थस्य नकारस्य णत्वविधानं भवति। उदाहरणं यथा-क्षीरपाणाः, सुरापाणाः, कषायपाणाः। एते सर्वेऽपि देशार्थं बोधयन्ति। दाक्षिपानम् इत्यादौ देशभिन्नत्वात् नकारस्य णत्वं न भवतीति ।

८.एकाजुत्तरपदेण[९]-एकाच्विद्यमानोत्तरपदस्थस्य रेफषकारनिमित्तम् नकारस्य णत्वं विधीयते इति सूत्रस्यार्थः। अत्र प्रातिपदिकान्तनुम् इत्यादीनां व्यवधानसत्यपि नकारस्य णत्वं विधीयते । उदाहरणं यथा-वृत्रहन् औ वृत्रहणौ, क्षीरपेण इत्यादयः ।

९.हिनुमीना[१०]-उपसर्गरेफषकारनिमित्तम् उत्तरपदस्थस्य हिनुमीना इति द्वयोः नकारस्य णत्वं भवतीति सूत्रार्थः। उदाहरणं यथा-प्रहिणोति, प्रहिणुतः, प्रमीणीते, प्रमीणाति इत्यादयः ।

१०.नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च[११] – उपसर्गस्थितरेफषकारनिमित्तं नि इति उपसर्गस्य नकारस्य णत्वविधानं भवति किन्तु यदि अनन्तरं गद्, नद, पत्, पद्, दा, धा, मा, षो, हन्, या, वा, द्रा, प्सा, वप्, वह्, शम्, चि, दिह् इत्यादयः धातवः भवन्ति चेत् इति। उदाहरणं यथा-प्रणिगदति, परिणिनदति, परिणिपद्यते, परिणिमयते, प्रणिवाति, प्रणिवहति, प्रणिदेग्धि, प्रणिचिनोति, प्रणिशाम्यति इत्यादयः ।

११.अनितेरन्तः[१२]-उपसर्गस्थरेफषकारनिमित्तम् अन्धातोः नकारस्य णत्वं विधीयते व्यवधाने सत्यपि। उदाहरणं यथा-प्राण्, पराण् इत्यादयः ।

१२.हन्तेरत्पूर्वस्य[१३]-उपसर्गस्थितरेफषकारनिमित्तं हन्धातोः नकारस्य णत्वविधानं भवति। उदाहरणं यथा- परिहण्यते, प्रहणनम्, परिहणनम् इत्यादयः।

१३.वमोर्वा[१४]-उपसर्गस्थितरेफषकारनिमित्तं हन्धातोः नकारस्य णत्वविधानं विकल्पेन भवति यदि अनन्तरं वकारमकारौ भवतः। उदाहरणं यथा- प्रहण्वः, प्रहन्वः , प्रहण्मः, प्रहन्मः इत्यादयः।

१४.अन्तरदेशे[१५]-अन्तर् इति अव्ययात् परः देशभिन्नार्थे हन्धातोः नकारस्य णत्वं विधीयते। उदाहरणं यथा- अन्तर्हणनम्। किन्तु अन्तर्हननो देशः इत्यादौ नकारस्य देशाभावात् णत्वं न भवतीति।

१५.अयनं च[१६] – अन्तर् इत्यव्ययात् देशभिन्नार्थे अयनशब्दस्य नकारस्य णत्वविधानं भवतीति सूत्रार्थः। उदाहरणं यथा-अन्तरयणम्।

१६.छन्दस्यृदवग्रहात्[१७]– वेदविषये ऋकारान्त अवगृह्यमाण-पूर्वपदात् नकारस्य णत्वं विधीयते । उदाहरणं यथा- नृमणाः इति ।

१७.कृत्यचः[१८]- उपसर्गस्थरेफषसकारनिमित्तम् उत्तरपदस्थस्य कृत्संज्ञकस्य अचः परः नकारस्य णत्वविधानं भवतीति सूत्रस्यार्थः। उदाहरणं यथा-परि या अन परियाणम्, प्रहीणः, परिहीणः इत्यादयः।

१८.णेर्विभाषा[१९]-उपसर्गस्थरेफषकारनिमित्तं णिजन्तस्योत्तरकृत्प्रत्ययस्य नस्य णत्वविधानं भवतीति सूत्रार्थः। उदाहरणं यथा-प्रयापणम्, प्रयाप्यमाणम् इति ।

१९.इजादेश्च सनुमः[२०]-उपसर्गस्थरेफषकारनिमित्तम् उत्तरपदे यदि इजादिनुम्सहितहलन्तधातुविहित -कृत्प्रत्ययः भवति चेत् तर्हि नकारस्य णकारः विधास्यते । उदाहरणं यथा- प्रेङ्खणम्, प्रोम्भणम् ।

२०.वा निंसनिक्षनिन्दाम्[२१]- उपसर्गस्थरेफषकारनिमित्तम् आश्रित्य उत्तरपदे यदि निंस,निक्ष,निन्द आदि धातवः भवन्ति चेत् तर्हि तस्य नकारस्य णकारः भवतीति । उदाहरणं यथा-प्रणिक्षणम्, प्रणिन्दनम् इत्यादयः ।

२१.न भाभूपूकमिगमिप्यायीवेपाम्[२२] – उपसर्गस्थरेफषकारनिमित्तं भा भू पू कमि गमि प्यायी वेप् धातूनां णत्वविधानं न भवति। उदाहरणं यथा-प्रभवनम्, प्रपवनम्, प्रकमनम्, प्रगमनम्, प्रवेपनम् इत्यादयः ।

२२.षात्पदान्तात्[२३] – पदान्ते विद्यमानात् षकारात् परः कृत्विशिष्टस्य नकारस्य णत्वं न भवतीति सूत्रार्थः। उदाहरणं यथा-निष्पानम्, दुष्पानम्, सर्पिष्पानम् इति । पदव्यवायेऽपि इति सूत्रेण णत्वविधिः निषिध्यते। यथा-त्रिनेत्रः, सर्वनामः, मुद्राङ्कनम्, मरनाथः, चारुनेत्रः, भृङ्गनादः इत्यादयः ।

२३.नशेः षान्तस्य[२४] – उपसर्गस्थरेफषकारात् परः नश्धातोः नकारस्य णकारः न भवति । यथा प्रनष्टः।

२४.पदान्तस्य[२५]- पदान्तस्य नस्य णकारः न भवति । यथा- रामान्, वृक्षान्, हरीन्, ऋषीन्, गुरून्, इक्षून् इति

२५.क्षुभ्नादिषु च[२६] - क्षुभ्नादिगणे पठितानां शब्दानां णत्वविधानं न भवति। उदाहरणं यथा-क्षुभ्नाति, नरीनृत्यते, शिक्षकेन इत्यादयः। अयं गणः आकृतिगणः भवति। एतदतिरिच्य कानिचिद् स्वाभाविकणत्व-विशिष्टपदानि अधःस्थितश्लोकमाध्यमेन ज्ञायन्ते ।

कङ्कणं किङ्गिणी कोणः कणिका काकिणी कणः
कल्याणं कुणपः काणः ककोणिश्चिक्कणः किणः ।
निक्कणो निक्कणः क्वाणो लावण्यं गणिका गणः
मत्कुणः शोणितं शौणः पण्यं पुण्यं पणो मणिः ।।
वाणिज्यं विपणिः शाणो वणिगापण उल्व णः
वाणो वीणा घुणो वेणुस्त्रुणः स्थाणुः फणा फणी
पणवो लवणं गोणी चकणोऽणुऋणः कुणिः

माणिक्यं पङ्कणो वेणी पाणिरेणस्तथैव च ।
भाणो वाणी स्वतो ह्येते शब्दा णत्वं प्रपेदिरे ।।

एवं रूपेण पाणिनीयव्याकरणे णत्वविधायकसूत्राणि निषेधसूत्राणि चोपन्यस्तानि । येषामध्ययनेन ज्ञानेन च पदेषु णत्वविषयकसन्देहाः निराकर्तुं शक्यन्ते इति शम् ।

**सहायकग्रन्थसूची-**

१. अष्टाध्यायी-पाणिनी-समलालकपूष्ट्राष्ट, सोनिपत, हरियाणा २००६
२. वै.सि. कौमुदी-भट्टोजिदीक्षितः, चौखम्बाविद्याभवन, वाराणसी-२००८
३.अष्टाध्यायीसूत्रपाठः-चौखम्बाविद्याभवन, वाराणसी-२००

**पाटटिप्पन्यः-**

१.अ.सू.सं-४.१.१
२. अ.सू.सं-४.१.२
३. अ.सू.सं-४.१.३
४. अ.सू.सं-४.१.४
५. अ.सू.सं-४.१.६
६. अ.सू.सं-४.१.७
७. अ.सू.सं-४.१.९
८. अ.सू.सं-४.१.१२
९. अ.सू.सं-४.१.१५
१०. अ.सू.सं-४.१.१७
११. अ.सू.सं-४.१.१९
१२. अ.सू.सं-४.१.२१
१३. अ.सू.सं-४.१.२२
१४. अ.सू.सं-४.१.२३
१५. अ.सू.सं-४.१.२४
१६. अ.सू.सं-४.१.२५
१७. अ.सू.सं-४.१.२८
१८. अ.सू.सं-४.१.२९
१९. अ.सू.सं-४.१.३१
२०. अ.सू.सं-४.१.३२
२१. अ.सू.सं-४.१.३३
२२. अ.सू.सं-४.१.३४
२३. अ.सू.सं-४.१.३५
२४. अ.सू.सं-४.१.३६
२५. अ.सू.सं-४.१.३८